## ४८. वार्षिकोत्सववर्णनम्

नैव / अपि / सम्यक्

पत्नी - ह्यः वयं विद्यालयस्य वार्षिकोत्सवं गतवत्यः ।

पतिः - कार्यक्रमः कथम् आसीत् ?

पत्नी - सम्यक् आसीत् । परं किञ्चित् दीर्घः कार्यक्रमः आसीत् ।

पतिः - के के कार्यक्रमा आसन् ?

पत्नी - नूतनानां कार्यक्रमाणाम् आयोजनं कृतवन्तः । राजस्थानी-गीतस्य नृत्यं बालिकानाम् आसीत् । बालकानाम् हिन्दी-गीतस्य नृत्यम् आसीत् ।

पतिः - केवलं नृत्यम् आसीत् किम् ?

पत्नी - नैव, शिक्षकाणां संस्कृतनाटकम् आसीत् । ते सम्यक् न कृतवन्तः । जनाः अपि अर्थम् अज्ञात्वा कोलाहलं कृतवन्तः ।

पतिः - बालकानां नाटकं न आसीत् वा ?

पत्नी - नैव, आरम्भे एव युवतीनाम् स्वागतनृत्यम् आसीत् । अपरः कार्यक्रमः अतिविशिष्टः ।

पतिः - कः कार्यक्रमः ?

पत्नी - 'पञ्चभूतानां मेलनं इति' प्रथमं, भूमिः, आकाशः, पवनः, पावकः, जलम्-एतेषां पृथक् नृत्यम् । अनन्तरं सर्वेषां मिलित्वा नृत्यम् । मध्ये मध्ये सम्भाषणम्-इत्युक्ते नृत्यरूपकम् आसीत् ।

पतिः - कार्यक्रमस्तु सम्यक् आसीत् । तथैव अलङ्काराः अपि आसन् किम् ?

पत्नी - दीपानाम् अलङ्कारः, ध्वनिवर्धकानां, पुष्पाणां, फलानां-इत्यादीनां बहुविधाः अलङ्काराः आसन् ।